पुरुषाणां तत्र कर्तृत्वोपलम्भादनेनैव सकलजगज्जननोत्पत्तावितरवैयर्थ्यञ्च। तदुक्तं वीतरागस्तुतौ।

> कर्त्तास्ति नित्यो जगतः स चैकः
> स सर्व्वगः सन् स्ववशः स सत्यः।
> इमाः कुहेवाकविडम्बनाः स्यु-
> स्तेषां न येषामनुशासकस्त्वम्॥ इति॥

अन्यत्रापि।

> कर्त्ता न तावदिह कोऽपि यथेच्छया वा
> दृष्टोऽन्यथा कटकृतावपि तत्प्रसङ्गः।
> कार्य्यं किमत्र भवतापि च तक्षकाद्यै-
> राहत्य च त्रिभुवनं पुरुषः करोतीति॥

तस्मात् प्रागुक्तकारणत्रितयबलादावरणप्रक्षये सार्व्वज्ञ्यं युक्तम्। न चाप्तोपदेशान्तराभावात् सम्यग्दर्शनादित्रितयानुपपत्तिरिति भणनीयं पूर्व्वसर्व्वज्ञप्रणीतागमप्रभवत्वादहस्याशेषार्थज्ञानस्य। नचान्योन्याश्रयतादिदोषः आगमसर्व्वज्ञपरम्पराया बीजाङ्कुरवदनादित्वाङ्गीकारादित्यलम्।

रत्नत्रयपदवेदनीयतया प्रसिद्धं सम्यग्दर्शनादित्रितयमर्हत्प्रवचनसङ्ग्रहपरे परमागमसारे प्ररूपितं सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग इति। विवृतञ्च योगदेवेन येन रूपेण जीवाद्यर्थो व्यवस्थितस्तेन रूपेणार्हता प्रतिपादिते तत्त्वार्थे विपरीताभिनिवेशरहितत्वाद्यपरपर्यायं श्रद्धानं सम्यग्दर्शनं तथा च तत्त्वार्थसूत्रं तत्त्वार्थं श्रद्धानं सम्यग्दर्शनमिति।

अन्यदपि।

> रुचिर्जिनोक्ततत्त्वेषु सम्यक् श्रद्धानमुच्यते।
> जायते तन्निसर्गेण गुरोरधिगमेन वेति॥

परोपदेशनिरपेक्षमात्मस्वरूपं निसर्गः व्याख्यानादिरूपपरोपदेशजनितं ज्ञानमधिगमः। येन स्वभावेन जीवादयः पदार्थाः व्यवस्थिताः तेन स्वभावेन मोहसंशयरहितत्वेनावगमः सम्यग्ज्ञानम्। यथोक्तम्।

> यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा।
> योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनीषिणः॥
> इति॥

तज्ज्ञानं पञ्चविधं मतिश्रुतावधिमनःपर्य्यायकेवलभेदेन। तदुक्तम् मतिश्रुतावधिमनःपर्य्यायकेवलानि ज्ञानमिति। अस्यार्थः ज्ञानावरणक्षयोपशमे सति इन्द्रियमनसी पुरस्कृत्य व्यापृतः सन् यथार्थं मनुते सा मतिः। ज्ञानावरणक्षयोपशमे सति मतिजनितं स्पष्टं ज्ञानं श्रुतम्। असम्यग्दर्शनादिगुणजनितक्षयोपशमनिमित्तमवच्छिन्नविषयं ज्ञानमवधिः। ईर्ष्यान्तरायज्ञानावारणक्षयोपशमे सति परमनोगतस्यार्थस्य स्फुटं परिच्छेदकं ज्ञानं मनःपर्य्यायः। तपःक्रियाविशेषान् यदर्थं सेवन्ते तपस्विनस्तज्ज्ञानमन्यज्ञानसंस्पृष्टं केवलम्। तत्राद्यं परोक्षं प्रत्यक्षमन्यत्। तदुक्तम्।

> विज्ञानं स्वपराभासि प्रमाणं बाधवर्ज्जितम्।
> प्रत्यक्षञ्च परोक्षञ्च द्विधा मेयविनिश्चयादिति॥

अन्तर्गणिकभेदस्तु सविस्तरस्तत्रैवागमेऽवगन्तव्यः। संसरणकर्म्मोच्छित्तावुद्यतस्य श्रद्दधानस्य ज्ञानवतः पापगमनकारणक्रियानिवृत्तिः सम्यक्चारित्रम्। तदेतत् सप्रपञ्चमुक्तमर्हता।

> सर्व्वथावद्ययोगानां त्यागश्चारित्रमुच्यते।
> कीर्त्तितं तदहिंसादिव्रतभेदेन पञ्चधा॥
> अहिंसासूनृतास्तेयब्रह्मचर्य्यापरिग्रहाः॥
> न यत्प्रमादयोगेन जीवितव्यपरोपणम्।
> चराणां स्थावराणाञ्च तदहिंसाव्रतं मतम्॥
> प्रियं पथ्यं वचस्तथ्यं सूनृतं व्रतमुच्यते।
> तत्तथ्यमपि नो तथ्यमप्रियञ्चाहितञ्च यत्॥
> अनादानमदत्तस्यास्तेयव्रतमुदीरितम्।
> वाह्याः प्राणा नृणामर्थो हरता तं हता हि ते॥
> दिव्यौदरिककामाणां कृतानुमतकारितैः।
> मनोवाक्कायतस्त्यागो ब्रह्माष्टादशधा मतम्॥
> सर्व्वभावेषु मूर्च्छायास्त्यागः स्यादपरिग्रहः।
> यदसत्स्वपि जायेत मूर्च्छया चित्तविप्लवः॥
> भावनाभिर्भावितानि पञ्चभिः पञ्चधा क्रमात्।
> महाव्रतानि लोकस्य साधयन्त्यव्ययं पदमिति॥
> भावनापञ्चकप्रपञ्चनञ्च प्ररूपितम्।
> हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम्।
> आलोच्यभाषणेनापि भावयेत् सूनृतं व्रतम्॥
> इत्यादिना॥

एतानि सम्यग्दर्शनज्ञानचारित्राणि मिलितानि मोक्षकारणं न प्रत्येकं यथा रसायनज्ञानं श्रद्धानावरणानि सम्भूय रसायनफलं साधयन्ति न प्रत्येकम्।

अत्र संक्षेपतस्तावज्जीवाजीवाख्ये द्वे तत्त्वे स्तः तत्र बोधात्मको जीवः अबोधात्मकस्त्वजीवः। तदुक्तं पद्मनन्दिना।

> चिदचिद्द्वे परे तत्त्वे विवेकस्तद्विवेचनम्।
> उपादेयमुपादेयं हेयं हेयञ्च कुर्व्वतः॥
> हेयं हि कर्तृरागादि तत्कार्य्यमविवेकिनः।
> उपादेयं परं ज्योतिरुपयोगैकलक्षणमिति॥

सहजचिद्रूपपरिणतिं स्वीकुर्व्वाणे ज्ञानदर्शने उपयोगः स परस्परप्रदेशानु प्रदेशबन्धात् कर्म्मणैकीभूतस्य आत्मनोऽन्यत्वप्रतिपत्तिकारणं लक्षणं भवति। सकलजीवसाधारणं चैतन्यमुपशमक्षयक्षयोपशमवशादौपशमिकक्षयात्मकक्षयोपशमिकभावेन कर्म्मोदयवशात् कलुषाद्याकारेण च परिणतजीवपर्य्यायजीवविवक्षायां स्वरूपं भवति। यदवोचद्वाचकाचार्य्यः औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य सत्त्वमौदयिकपारिणामिकौ चेति। अनुदयप्राप्तिरूपे कर्म्मण उपशमे सति जीवस्योत्पद्यमानभावः औपशमिकः यथा पङ्के कलुषतां कुर्व्वति कतकादिद्रव्यसम्बन्धादधः पतिते जलस्य स्वच्छता। कर्म्मणः क्षयोपशमे सति जायमानो भावः क्षायिकः यथा मोक्षः। उभयात्मा भावो मिश्रः यथा जलस्यार्द्धस्वच्छता। कर्म्मोदये सति भवन् भाव औदयिकः। कर्म्मोपशमाद्यनपेक्षः सहजो भावश्चेतनत्वादिः पारिणामिकः। तदेतत् सत्त्वं यथासम्भवं भव्यस्याभव्यस्य वा जीवस्य तत्त्वं स्वरूपमिति सूत्रार्थः। तदुक्तं स्वरूपसम्बोधने।

> ज्ञानाद्भिन्नो न चाभिन्नो भिन्नाभिन्नः कथञ्चन।
> ज्ञानं पूर्व्वापरीभूतं सोऽयमात्मेति कीर्त्तितः॥
> इति॥

ननु भेदाभेदयोः परस्परपरिहारेणावस्थानादन्यतरस्यैव वास्तवत्वादुभयात्मकत्वमयुक्तमिति चेत्तदयुक्तं बाधे प्रमाणाभावात् अनुपलम्भो हि बाधकं प्रमाणं न सोऽस्ति समस्तेषु वस्तुष्वनेकरसात्मकत्वस्य स्याद्वादिनो मते सुप्रसिद्धत्वादित्यलम्।

अपरे पुनर्जीवाजीवयोरपरं प्रपञ्चमाचक्षते जीवाकाश-धर्म्माधर्म्म-पुद्गलास्तिकायभेदात्। एतेषु पञ्चसु तत्त्वेषु कालत्रयसम्बन्धितया स्थितिव्यपदेशः अनेकप्रदेशत्वेन शरीरवत् कायव्यपदेशः। तत्र जीवा द्विविधाः संसारिणो मुक्ताश्च भवाद्भवान्तरप्राप्तिमन्तः संसारिणः। ते च द्विविधाः समनस्का अमनस्काश्च तत्र संज्ञिनः समनस्काः शिक्षाक्रियालापग्रहणरूपा संज्ञा तद्विधुरास्त्वमनस्काः। ते चामनस्का द्विविधाः त्रसस्थावरभेदात् तत्र द्वीन्द्रियादयः शङ्खगण्डोलकप्रभृतयश्चतुर्विधास्त्रसाः पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः। तत्र मार्गगतधूलिः पृथिवी इष्टकादिः पृथिवीकायः पृथिवी कायत्वेन येन गृहीता स पृथिवीकायकः पृथिवीं कायत्वेन यो ग्रहीष्यति स पृथिवीजीवः। एवमबादिष्वपि भेदचतुष्टयं योज्यम्। तत्र पृथिव्यादि कायत्वेन गृहीतवन्तो ग्रहीष्यन्तश्च स्थावरा गृह्यन्ते न पृथिव्यादिपृथिवीकायादयः तेषां जीवत्वात्। ते च स्थावराः स्पर्शनैकेन्द्रियाश्च भवान्तरप्राप्तिविधुरा मुक्ताः धर्म्माधर्म्माकाशास्तिकायास्ते एकत्वशालिनो निष्क्रियाश्च द्रव्यस्य देशान्तरप्राप्तिहेतुः। तत्र धर्म्माधर्म्मौ प्रसिद्धौ आलोकेनाविच्छिन्ने नभसि लोकाकाशपदवेदनीये सर्व्वत्रावस्थितिर्गतिस्थित्युपग्रहौ धर्म्माधर्म्मयोरुपकारः अतएव धर्म्मास्तिकायः प्रवृत्त्यनुमेयः अधर्म्मास्तिकायः स्थित्यनुमेयः। अन्यवस्तुप्रदेशमध्येऽन्यस्य वस्तुनः प्रवेशोऽवगाहः तदाकाशकृत्यम्। स्पर्शरसवर्णवन्तः पुद्गलाः ते च द्विविधाः अणवः स्कन्धाश्च। भोक्तुमशक्या अणवः द्व्यणुकादयः स्कन्धाः। तत्र द्व्यणुकादिस्कन्धभेदादण्वादिरुत्पद्यते अण्वादिसंघातात् द्व्यणुकादिरुत्पद्यते क्वचिद्भेदसंघाताभ्यां स्कन्धोत्पत्तिः अतएव पूरयन्ति गलन्तीति पुद्गलाः। कालस्यानेक-प्रदेशत्वाभावेनाऽस्तिकायत्वाभावेऽपि द्रव्यत्वमस्ति तल्लक्षणयोगात् तदुक्तं गुणपर्य्यायवद्द्रव्यमिति। द्रव्याश्रया निर्गुणा गुणाः यथा जीवस्य ज्ञानत्वादिसामान्यरूपाः पुद्गलस्य रूपत्वादिसामान्यस्वभावाः धर्म्माधर्म्माकाशकायानां यथासम्भवं गतिस्थित्यवगाहहेतुत्वादि-